नी—अच् न०त० । नयाभावे अनीतौ दुर्नये, दुष्टे, कर्म्मणि च । "विजानतोऽपि ह्यनयस्य रौद्रतेति" भार०। न० ७अ० । आपदि "जीवेदेतेन राजन्यः सर्वेणाप्यनयं गत इति" मनुः । "सर्वतः प्रतिगृह्णीयात् ब्राह्मणस्त्वनयं गतः" इति मनुः "अनयमापदमिति" कुल्लू० । ६ब० । नयहीने त्रि० । [स हि रावणेन परिभूतो ह्यतः ।

अनरण्य पु० सूर्य्यवंश्ये नृपभेदे तत्कथा रामा० उत्तराकाण्डे

अनर्काभ्युदित पु० न ईषत्, अर्कोऽभ्युदितो यस्मिन् । ईषदर्कोदयकाले । "अनर्काभ्युदिते काले माघे कृष्णचतुर्दशीइति" यमः "माघे मासि रटन्त्यापः किञ्चिदभ्युदिते रवौ" इत्यनेनैकवाक्यत्वात् नञ ईषदर्थता ।

अनर्गल त्रि० नास्ति अर्गलं प्रतिबन्धकं यस्य । अप्रतिबन्धके प्रतिबन्धकशून्ये "तुरङ्गमुत्सृष्टमनर्गलं पुनरिति" रघुः ।

अनर्घ त्रि० अर्घो मूल्यं न०ब० । अमूल्ये । [नाटकभेदे ।

अनर्घराघव न० राघवचरितख्यापके मुरारिमिश्ररचिते

अनर्घ्य त्रि० न अर्घ्यः पूज्यो यस्य, यस्माद्वा । अन्यपूज्यशून्ये अत्यन्तपूजनीये च "अनर्घ्यमर्घेण तमद्रिनाथ" इति कुमा०।

अनर्थ पु० अर्थः प्रयोजनं विरोधे न०त० । अनिष्टे । "एकैकमप्यनर्थाय किमु तत्र चतुष्टयमिति" हितो० । "नोदनालक्षणोऽर्थो धर्म्म" इति सूत्रे निषेधलक्षणोऽनर्थोऽधर्म इति भङ्ग्या सूचिते नरकादिसाधनत्वादनिष्टहेतावधर्म्मे च । "दातृभवत्यनर्थाय परत्रादातुरेव चेति" मनुः । ब० । अभीष्टरहिते विष्णौ पु० आप्तकामत्वात्तत्त्वम् । अर्थोऽभिधेयः प्रयोजनं वा नास्ति यस्य ब० कप् । अर्थरहितमात्रे त्रि० ।

अनर्थक न० अर्थोऽभिधेयोऽप्राशस्त्ये न०ब० कप्समा० । समुदायार्थशून्ये प्रलापे, असम्बद्धे वाक्ये च । व्यर्थे त्रि० । "धिगिदं जीवितं लोके किमु ? सार्थमनर्थकमिति" ।

अनर्थलुप्त त्रि० इष्टेनार्थेन अलुप्तः असम०स० । दृष्टार्थेनालुप्ते "अनर्थलुप्ता इति" कात्या० ६,१०,२०, ।

अनर्थान्तर त० अन्योऽर्थः अर्थान्तरं मयूर०त० ततः न०त० । अभेदे, एकार्थे ।

अनर्व त्रि० ऋ–व अर्वः गतिः शैथिल्यं स नास्ति यस्य । अशिथिले "विनाभि चक्रमजरमनर्वमिति ऋ० १,१६४,२, 'अनर्वमशिथिलमिति" भा० ।

अनर्वन् त्रि० अर्व–हिंसायां कनिन् "अर्वा भ्रातृव्य" इति श्रुतेः अर्वा सपत्नः न० त० । शत्रुभिन्ने । "जनोऽनर्वाणं तं परित" इति ऋ० १,१३६,५, "अनर्वाणमहेष्यमिति" भा० । अर्वा अश्वः । तच्छून्ये त्रि० । न त्वादेशः ।

अनर्विश् त्रि० अनसा शकटेन विशति प्राप्नोति विश–क्विप् ३त० अलुक्स० ऋ:, ऋ–कर्मणि विच् अरं गन्तव्यं प्रति विशति विश–क्विप् वा न०त० । शकटेन काष्ठाद्याहरणाय वनप्रवेशिनि, गन्तव्यं स्थलं गन्तुमशक्ते च । "अनू धूनमनर्विशे पश्विषे तुरायेति" ऋ० १,१२१,७,

अनर्शराति त्रि० अनर्शाय अपापिष्ठाय रातिर्दानं यस्य । अपापिष्ठे दातरि "अनर्शरातिं वसुदामुपस्तुहीति ऋ० ८, ६९,४, अनर्शरातिमनश्लीलदानमश्लीलं पापमिति निरुक्त०

अनर्ह न अर्हः । अयोग्ये । "तान् हव्यकव्ययोर्विप्राननर्हान् मनुरब्रवीदिति" मनुः ।

अनल पु० नास्ति अलः पर्य्याप्तिर्यस्य बहुदाह्यदहनेऽपि तृप्त्यभावात् न०ब० । वह्नौ, "व्यभिचचार न तापकरोऽनल" इति नैषधम् अनलः नलाभावोवह्निश्च अनुपलम्भवदभावार्थे न०त० । अव्ययीभावमिद्धत्वे क्लीवता स्यात् । "ऊचे नलोऽयमिति तं प्रति चित्तमेकं ब्रूतेऽस्य चान्यदनलोऽयमितीदमीयमिति" "आवर्ज्जनं तमनु ते ननु साधु नामप्याहं मयानलमुदीरितमेतदत्र" इति "सैषानले सहजरागभरादिति" च नैषधम् "वयोभिः खादयन्त्यन्ये प्रक्षिपन्त्यनलेऽप्सु वेति" स्मृतिः । जठरानलस्य पित्तजातत्वात् देहस्थे पित्तधातौ च । अष्टवसुमध्ये पञ्चमे वसौ, मेदिनिः तत्र "धरोध्रुवः सोमनामा तथाऽपोऽप्यनिलोनल" इति वसुभेदबोधकवचने नलइत्यत्रानलइत्याकारप्रश्लेषश्चान्यैर्व्रक्तं किन्तु वसूनां स्वरूपख्यापके विष्णुधर्म्मोत्तरवचने "स्रुवाक्षमालिके दक्षे वामे शक्तिकपालभृत् सव्योर्द्ध्वादिक्रमाद्योऽसौ नलाख्यस्तु वसुः स्मृत" इति नलनामत्वस्यैव प्रतीतेर्नलएव वसुभेद इत्यवधेयम् । अनलदैवतत्वात् कृत्तिकानक्षत्रे "अनलविधिशताख्येति ज्योति० । (चिता) इति ख्याते चित्रके वृक्षे, पु० । तस्य सर्वतः पर्य्याप्तत्वेऽपि पर्य्याप्तेः सीमाभावात्तत्त्वम्, (भेला) इति ख्याते भल्लातके वृक्षे च । अन–कलच् । षष्टिवर्षमध्ये पञ्चाशत्संख्याते वर्षे षष्टिवर्षगणननामभेदादि वर्षशब्दे वक्ष्यते । पितृदेवभेदे 'कव्यवालोऽनलः सोमः यमश्चैवार्य्यमा तथा अग्निष्वात्ताः बर्हिषदः सोमपाः पितृदेवता" इति वायुपुरा० । अनान् प्राणान् लाति आत्मत्वेन अनलः जीवः । तद्रूपेण सर्वान्तर्यामितया स्थिते विष्णौ णल–गन्धे बन्धे वा न नलति न बध्यते वा अच् । गन्धशून्ये परमेश्वरे विष्णौ "अगन्धनस्य शर्म्म रस" इति "तथा रसं नित्यमगन्धवच्चेति"